Prantik Gabeshana Patrika ISSN 2583-6706 (Online)
Multidisciplinary-Multilingual- Peer Reviewed-Bi-Annual
Digital Research Journal
Website : santiniketansahityapath.org.in
Volume-3 Issue-2 January 2025

# अप्रस्तुत-प्रशंसालङ्कारस्य विवर्तनधारा

**सौमी भट्टाचार्य**

**Link : https://santiniketansahityapath.org.in/wp-content/uploads/2025/02/3_Soumi-Bhattacharya.pdf**

**Abstract :** Sanskrit literary theory is exceedingly vast and profoundly deep. It is inferred that the general principles of Alaṅkāra (figures of speech) were established by ancient scholars long ago. The flow of the general form of Alaṅkāra has continued uninterruptedly and is still prevalent today. Even before the contributions of Bharata and other theorists, the extensive usage of Alaṅkāras is evident in our ancient Vedic literature.

In the Ṛgveda, for instance, in the very first hymn, the sages describe Agni with the metaphor:

"sa naḥ piteva sūnave'gne sūpāyano bhava" (Ṛgveda 1.1.9).

This is an example of the Upamālaṅkāra (simile). Further, in the Kaṭhopaniṣad, we find an example of Rūpaka Alaṅkāra (metaphor):

"ātmānaṁ rathinaṁ viddhi śarīraṁ ratham eva tu" (Kaṭha 3.3).

While the Vedas exhibit the usage of Alaṅkāras, explicit explanations or detailed analysis of these figures of speech are not observed in them. Similarly, even in the Purāṇas and other post-Vedic scriptures, the detailed exposition of Alaṅkāras is not found. A comprehensive discussion and systematic elaboration of Alaṅkāras is found only in treatises specifically related to Alaṅkāra-śāstra.

The scope of Alaṅkāras is immensely expansive. For those aspiring to gain knowledge in literary theory, Mukulabhaṭṭa has stated:

"padavākyapramāṇeṣu tadetatprativimbitam।
yo yojayati sāhitye tasya vāṇī prasīdati॥"

This implies that a person who is well-versed in grammar, capable of comprehending the meanings elucidated in the scriptures, and skilled in the proper application of canonical principles is fit to explore the grand domain of literary theory. In this context, my condition is aptly described by Kālidāsa in the line:

"titīrṣur dustaraṁ mohād uḍupenāsmi"

("I am attempting to cross an impassable ocean with a small boat due to delusion").

With limited knowledge, it is impossible to encompass such a vast field. However, with the grace of the Divine, I have humbly presented some aspects related to the definition and interpretation of the Alaṅkāra known as Aprasthutapraśaṁsā.

**Keyword:** Alaṅkāras, Alaṅkāra-śāstra, Aprasthutapraśaṁsā.

**भूमिका:**

संस्कृतसाहित्यशास्त्रं परममहत् अतिगभीरञ्च। अलङ्कारसामान्यरूपस्य प्रवर्तनं बहुपूर्वे शास्त्रकारैः कृतमित्यनुमानं क्रियते। अलङ्कारस्य सामान्यरुपस्य धाराप्रवाहो विच्छिन्नभावेनाद्यापि प्रवाहितः। भरतादीनामालङ्कारिकाणां प्रागेव अस्माकं सुप्राचीने वैदिकसाहित्ये अलङ्कारस्य बहुलः प्रयोगः दृश्यते,ऋग्वेदस्य प्रथमे मन्त्रे ऋषिभिरुच्यते अग्निमुद्दिश्य अग्निसूक्ते —

"स नः पितेव सूनवेऽग्ने सूपायनो भवा"[1](ऋ.वे.१/१।९)

उपमालङ्कारस्योदाहरणमिदम्। एतदतिरिच्य कठोपनिषदे रूपकालङ्कारस्योदाहरणम् —

"आत्मानं रथिनं विद्धि शरीरं रथमेव तु"[2] (कठ,३/३)

केवलमलङ्काराणां प्रयोगो दृश्यते वेदे, अलङ्काराणां सुस्पष्टा व्याख्या न परिलक्ष्यते। वेदपरवर्तीपुराणादिशास्त्रेपि अलङ्काराणां विशद्व्याख्या नोपलभ्यते। अलङ्कारस्य सुविस्तृतविवरणमलङ्कारशास्त्रसम्बन्धीयग्रन्थे प्राप्यते। अलङ्कारस्य वृत्तान्तमतीव व्यापकविहारी। साहित्यशास्त्रे ज्ञानार्जने इच्छुका व्यक्ति कीदृशी भवेदस्मिन् विषये मुकुलभट्टेनोद्यते —

"पदवाक्यप्रमाणेषु तदेतत्प्रतिविम्बितम्।
यो योजयति साहित्ये तस्य वाणी प्रसीदति।।"[3]

अर्थात् व्याकरणशास्त्राभिज्ञः शास्त्रप्रतिपादितार्थस्याववोधने समर्थः यथोपयुक्तस्थाने प्रतिपादितागमस्य विनियोगे पारङ्गमो जनः शास्त्रस्य सुमहति मार्गे विचरणे शक्यः। अस्मिन्सन्दर्भे ममावस्था कालिदासेनोक्ता "तितीर्षुःदुस्तरं मोहादुडुपेनास्मि" सदृशी।स्वल्पतथ्यसहितेन एतद्विस्तरं क्षेत्रमवतरणमासम्भवम्, तु भगवतः कृपाप्रार्थिनोऽहमप्रस्तुतप्रशंसालङ्कारस्यलक्षणविवर्तनसन्दर्भे कांश्चन विषयानुपस्थापितवती।

## अलङ्कारस्योपयोगिता

अलङ्कारशास्त्रस्य मुख्यालोच्यो विषयोऽस्ति काव्यालङ्काररिति। अलङ्कारशब्दस्य व्युत्पत्त्यावसरे अर्थद्वयस्यालोचना कृता वामनाचार्येण। प्रथमः, अलङ्क्रियते इति भावे घञ्प्रत्ययान्तालङ्कारशब्देन सौन्दर्यमित्यर्थः प्रतीयते,

"सौन्दर्यमलङ्कारः"[4](का°सू°१।१।१-२)

द्वितीयः, अलङ्क्रियते अनेनेति करणे घञ्प्रत्ययेन निष्पन्नस्यालङ्कारशब्दस्यार्थः-येन काव्यसौन्दर्यं जायमानमस्ति। वृत्तौ वर्तते —

"अलङ्कृतिरलङ्कारशब्दोऽयमुपमादिषु वर्तते। योऽयमलङ्कारः काव्यग्रहणहेतुत्वेन उपन्यस्यते तद्व्युत्पादकत्वाच्छास्त्रमपि अलङ्कार नाम्ना व्यपदिश्यते...।" [5](कामधेनु)

अर्थाद् काव्यलक्षणविधायिनामभिवर्णितं शास्त्रं यथार्थरूपेण अलङ्कारशास्त्रपदवाच्यं भवति। भरतादिप्राज्ञाचार्यैः स्वकीये ग्रन्थे अलङ्कारशास्त्रानुबन्धकमभिनन्दितमभिमतं स्थापितम्। अलङ्कारमाहात्म्यविषये भिन्नानामाचार्याणां भिन्नानि मतान्युपलब्धानि सन्ति। तेषु भामहकथितं वचनं सुप्रचलिम् —

"न कान्तमपि निर्भूषां विभाति वनिताननम्"[6](का°ल १।१३)

अलङ्काररहितं काव्यं भूषणहीनारमण्या सदृशं न मण्डितं भवति। अलङ्कारः काव्यशोभाकरधर्मरिति दण्डिनः मतम् —

"काव्यशोभाकरान् धर्मानलङ्कारान् प्रचक्षते"[7](का°द°२।१)

सौन्दर्यविधायकसामान्यार्थे अलङ्कारशब्दो प्रयुक्तः। यथोपयुक्तालङ्कारमण्डितकाव्यं शाश्वतं भवेत्।अतः सौन्दर्यवर्धनाय अलङ्कारस्य यथार्थप्रयोगः स्वीकृतः —

"तदतिशयहेतवस्तवलङ्काराः"[8](का°सू° ३।१।२)

काव्यशरीरे शब्दवाच्यावलम्बिनः ये धर्माः समुल्लिखिताः,तेषु अलङ्कारः विशिष्टः। शब्दार्थयोः धर्मस्वरूपालङ्कारेण रसोत्कर्षसहायको भवत्यलङ्कारः। अलङ्कारः काव्येनाङ्गाङ्गिभावेन संश्लिष्टो भवति,काव्ये सुप्रयुक्तालङ्कारस्य पृथग्करणं न सम्भवति। काव्ये रसभावादीनामाधारीकृत्य सन्निविष्टालङ्काराणामलङ्कारत्वं सिद्ध्यते। आनन्दवर्धनस्योक्तिरियम् —

"रसभावादीतात्पर्य्यमाश्रित्य विनिवेशनम्।
अलङ्कृतीनां सर्वासामलङ्कारत्वसाधनम्।।"[9](ध्वन्या°२।५)ध्वन्या°२।५

**अप्रस्तुतप्रशंसालङ्कारस्य स्वरूपवैचित्र्यम्** —

अर्थालङ्कारेष्वोपलक्षितः अलंकारोऽयमप्रस्तुतप्रशंसालंकारः। संस्कृतालङ्कारशास्त्रे अलङ्कारोऽयं सुप्रसिद्धः, कवीनां प्रियश्च। सादृश्यमूलकस्यास्यालङ्कारस्य विषये विविधानामार्चार्याणां लक्षणवैचित्र्यं दृश्यते। तेषामाचार्याणां मतमुद्धृत्यालङ्कारस्य स्वरुपविचारप्रसङ्गे अस्य लक्षणस्य विवर्तनधारा उपस्थापिता। नाट्यशास्त्रे तथा विष्णुधर्मोत्तरपुराणे अलङ्कारोयं न चर्चितः। रुद्रट्-हेमचन्द्राद्यालङ्कारिकान् विहाय प्रायः सर्वे आलङ्कारिकाः अलङ्कारस्य लक्षणस्योदाहरणं स्वकीये ग्रन्थे निविष्टवन्तः। यद्यपि लक्षणविश्लेषणे तेषां भिन्नानि मतानि लक्षितानि। मुलतः अलङ्कारस्य लक्षणोक्ते "स्तुतिः" इत्यंशे बहुविकल्पचिन्तनं दृष्टम्। पण्डितराजजगन्नाथस्य मते —

"प्रशंसनं च वर्णनमात्रम्,न तु स्तुतिः"[10] (र.ग.)

अधुना मूलवक्तव्यविषयस्य पदाङ्कांनुसरामि। अग्निपुराणमिति पुराणग्रन्थेषु विशिष्टः, बहुविधानामलङ्काराणां व्याख्यया सह अप्रस्तुत-प्रशंसालङ्कारस्य विवरणमप्यत्र परिलक्षितम्। अग्निपुराणोपल्लिखितलक्षणेन भामहाचार्येण कृतस्य लक्षणस्य रूपसादृश्यं लक्ष्यते। काव्यालङ्कारग्रन्थे भामहेनोच्यते —

"अधिकारादपेतस्य वस्तुनोऽन्यस्य या स्तुतिः।
अप्रस्तुतप्रशंसेति सा चैव कथ्यते यथा।।
प्रीणितप्रणये स्वादु काले परिणतं बहु।
विना पुरुषकारेण फ़लं पश्यत शाखिनाम्।।"[11] ( का°ल ३I २९-३०)

मुख्यविषयस्य स्थाने अन्यस्य कस्यचित् अप्रस्तुतविषयस्य प्रशंसा, अप्रस्तुतप्रशंसा — भामहस्य मतस्य सरलार्थः। मुख्यवस्तुनः प्रशंसार्थमप्रस्तुतवस्तुनः प्रशंसा क्रियते, मात्रमुपस्थापनीयाप्रस्तुतविषयस्य स्तुत्या प्रस्तुतपदार्थस्य स्तुतिः करणीया। अनेन सामान्यभावेन लक्षणं कृतं भामहेन। उदाहरणे "वृक्षः" इति अप्रस्तुतवस्तु इव वर्ण्यते। वृक्षः स्वस्य कदापि प्रयत्नं न करोति, तथापि तस्य फ़लोपकरणानि सुखस्यादानायोपयोगिनी। तैः सुखिनः परमां तृप्तिं लभन्ते, तेषां प्रीतिश्च सम्पादिता भवति। अत्र स्वाभाविकरूपेण वृक्षस्य प्रशंसा दृष्टा तु प्राधान्येन अनया प्रयत्नरहिताः परोपकारकुर्वन्तः जनारभिप्रेताः। अप्रस्तुतवृक्षस्य प्रशंसाद्वारा तत्सादृशानां प्रस्तुतपरोपकारिजनानां प्रशंसेति मुख्याभिप्रायरत्र। उभयोर्मध्ये तुल्यसादृश्यवशतरप्रस्तुतस्य प्रत्यक्षप्रशंसाकथनेन परोक्षतया स्वीयविभवेन अन्येषां मित्राणाम्, स्वजनानाञ्च सुखसम्पाद्यामाना व्यक्तिरभिप्रेता। अत्र स्तुतिरिति केवलं प्रशंसार्थे लक्षितं भवति। आलङ्कारिकदण्डी अस्यालङ्कारस्य लक्षणप्रसङ्गे अवदत् —

"अप्रस्तुतप्रशंसा स्यादपक्रान्तेषु या स्तुतिः"[12] (का°द ३ ।३४०)

प्रस्तुतस्य निन्दार्थमप्रस्तुतस्य या स्तुतिः, सा अप्रस्तुतप्रशंसाI लक्षणोक्तस्य "अपक्रान्तेषु" अंशस्यार्थः— "अप्रस्तुतेषु" इति। अप्रस्तुतस्य स्तुत्या प्रस्तुतस्य निन्दा सूचिता भवेत् — इति तस्य लक्षणस्याभिप्रायः। अत्र प्रस्तुतस्य निन्दा गम्यमाना अस्ति अर्थात् प्रशंसामाध्यमेन केवलं प्रशंसा नाभिप्रेता, प्रशंसाद्वारा निन्दापि सूचिता। उदाहरणेन अर्थोऽयं विस्पष्टः भवेत् —

"सुखं जीवन्ति हरिणा वनेष्वोपरसेविनः।
अन्नैरयत्नसुलभैस्तृणदर्भाङ्कुरादिभिः।।"[13] (का°द २I३४१)

प्रभोः सेवारतस्य कस्यचन सेवकस्य उक्तिरियम्। वने अन्येषामनधीनस्तो मृगोऽयत्नसुलभान् तृणादीन् संगृह्य सुखेन दिनं यापयति। अत्रान्यन्याश्रितहरिणस्य स्तुत्या मुलतः संसक्तसेवकस्य निन्दा वर्णिता। सेवकः जीवनार्थं परसेवाकारणात् खेदितः। अनेन दण्डिना कृतस्य लक्षणे तथा तस्य व्याख्यायां वैचित्र्यं लक्षितम्। अप्रस्तुतप्रशंसा केवलं वस्तुनः अलङ्काररूपं न, अपितु वक्तृवैशिष्ट्यञ्च दर्शयति। दण्डिनः दृष्ट्या निन्दायाः इयं गूढप्रस्तुतिरूपा अन्यता दृश्यते। काव्यालङ्कारस्य प्रणेता उद्भटाचार्यः, तस्य प्रदत्ते लक्षणे भामहाचार्यस्य प्रभावः सुस्पष्टः। भामहस्य दृष्टिमुपजीव्य निर्मिते लक्षणे "प्रस्तुतार्थानुबन्धिनी" उद्भटेन पदमिदं संयोज्य भिन्नं स्वरूपं रचितम् —

"अधिकारादपेतस्य वस्तुनोऽन्यस्य या स्तुतिः।

अप्रस्तुतप्रशंसेयं प्रस्तुतार्थानुबन्धिनी।।”[14] (का°ल ५I८)

अप्रस्तुतपदार्थस्य स्तुतिद्वारा प्रस्तुतपदार्थस्य गूढसम्बन्धो द्योतितः। अप्रस्तुतप्रस्तुतयोर्मध्ये सम्बन्धविषये तस्याभिमतं प्रणिधानयोग्यम्। एतयोर्मध्ये गुढात्मकोऽयं सम्बन्धः प्रकाशयोग्यो भवेत्। ईदृशी व्याख्या भिन्नतां प्रकटयति। उदाहरणं —

“यान्ति स्वदेहेषु जरामसम्प्राप्तोपभर्तिकाः।
फ़लपुष्पर्द्धिभजोऽपि दुर्गदिशवनप्रियः।।”[15] (का°ल)

यत्र कृच्छ्रेण गन्तुं शक्यः,तत्र तस्य काननस्य शोभा विशेषरूपेण वर्णिता। सा शोभा अपक्षयेनापि अद्भूतं सौन्दर्यं दर्शयतिI तासां शोभानां तुल्यभावेन भगवत्याः कृत्यमुपमेयरूपेण ज्ञायते, अर्थात् काननस्य शोभा भगवत्याः लीलास्वरूपेणानुभवनीयमिति।

प्रारम्भे अलङ्कारस्य स्वरुपनिर्वचने अप्रस्तुतस्य प्रशंसनं निन्दनञ्च लक्ष्यमासीत्। परवर्त्यालङ्कारिकाः अलङ्कारस्य स्वरुपविश्लेषणे भिन्नपक्षस्योद्भावनं कुर्वन्तः आसन्। तेषु काव्यालङ्कारसूत्रवृत्तिग्रन्थप्रणेतावामनाचार्यस्य प्रयास उल्लेखनीयः। उपमेयस्य लिङ्गमात्रस्य कथनम्, अर्थात् समानवस्तुरूपे प्रक्षेपनेन अलङ्कारस्य स्थितिः जायते। “उपमेयस्य किञ्चिद् लिङ्गमात्रेण उक्तौ समानवस्तुन्यासे अप्रस्तुतप्रशंसा”[16] (का.सू. ४I३-४)

वामनोत्तरवर्तिना भोजेन भिन्नं मतं विव्रीयते —

“अप्रस्तुतप्रशंसा स्यादस्तोतव्यस्य या स्तुतिः,कुतोऽपि हेतोर्वाच्या च सोच्यते।”[17] (सं.कं.४.५४)

उभयालङ्काररूपेण स्वीक्रियते तेनालङ्कारोऽयम्। वाच्य अथवा प्रत्येतव्य (व्यङ्ग्य) — इति उभयोः स्तितयोः अलङ्कारस्य अवसरः वर्तते। अलङ्कारस्य व्युत्पत्तिप्रतिपादने साहित्यदर्पणकारेणोक्तम् — अप्रस्तुतस्य वस्तुनः प्रशंसा प्रशंसनवद् प्रकृष्टकथनवद् व्यञ्जनया स्पष्टा सूचना अप्रस्तुतप्रशंसा। लक्षणप्रसङ्गे विश्वनाथेनोक्तम् —

“अप्रस्तुतात् प्रस्तुतं चेत् गम्यते... ”[18](सा.द.१०I ५८)

अर्थात् अप्रस्तुतपदार्थात् व्यञ्जनाद्वारा प्रस्तुतस्य प्रतीतिः, अप्रस्तुतप्रशंसाI अस्मिन् अलङ्कारे व्यवहारस्य समारोपो भवति। वृत्तौ ग्रन्थकारेणोच्यते —

“अस्याश्च समासोक्तिवत् व्यवहारसमारोपप्राणत्वात्... ”[19] (सा. द.१०I ५८)

विश्वनाथप्रदत्तसंज्ञानुसारेण प्रस्तुतशब्दस्यार्थः प्रासङ्गिकविषयः वा वर्णनीयविषयः। अप्रस्तुतपदेन प्रधानवर्णनीयविषयः सूचितः, अप्रस्तुतमिदं अपक्रान्त-अनधिकृत-अप्राकरणिक-अप्रासङ्गिकित्यादयै : शब्दैः उल्लिख्यते। कुन्तकाचार्येण अलङ्कारस्य स्वरुपकथने किञ्चिद् वैचित्र्यं प्रदर्शितवान्। अप्रस्तुतस्य वर्णनसमये प्रस्तुतस्य सौन्दर्यप्रकाशनमावश्यकमिति —

“अप्रस्तुतोऽपि विच्छित्तिं प्रस्तुतस्यावतारयन्।
यत्र तत् साम्यमाश्रितं सम्बन्धान्तरमेव वा।।”[20] (वक्रो.४.२३)

अप्रस्तुतस्य वर्णनं साम्याश्रितं अथवा अन्यसम्बन्धविशेषाश्रितं भवेदिति कुन्तकस्याभिमतम्। कुन्तकस्येदृशे वक्तव्ये प्रस्तुताप्रस्तुतयोः सम्बन्धविषये यः प्रश्नोत्थापितः,तस्य निराकर्तुं मम्मटेन सचेष्टोऽभवत्। तेन सुव्यवस्थितं रूपं प्रदर्शितम् —

“अप्रस्तुताश्रया या सा सैव प्रस्तुताश्रया”[21] (का.प्र.१०I९८)

अप्राकरणिकेन प्राकरणिकस्याक्षेपोऽप्रस्तुतप्रशंसा, प्राकरणिकेन अप्राकरणिकस्याक्षेपः समासोक्तिरिति। प्रस्तुतव्यञ्जनेन प्रस्तुताप्रस्तुतयोर्सम्बन्धः सम्भवतीति, तत्संन्धप्रदर्शनाय मम्मटाचार्येण अलङ्कारस्य भेदः क्रियते। प्रस्तुतस्य विच्छित्त्यै अप्रस्तुतस्य वर्णनं सारूप्यसामान्यविशेषभावाश्रितं भवेत् अथवा कार्यकारणभावाश्रितं भवेदिति कस्यचिदालङ्कारिकस्याभिमतम् —

"अप्रस्तुतात् सामान्यविशेषभावे कार्यकारणभावे सारूप्ये च प्रस्तुतप्रतीतावप्रस्तुतप्रशंसा।"[22]

जयदेवेन अलङ्कारे सारूप्यं न स्वीकृतवान्। कश्चन लक्षणमुलारूपेण अलङ्कारस्य तात्पर्यं स्वीकरोति, तेषां मतानुसारेण कस्मिन्नेव प्रसङ्गे प्रस्तुतस्यानादरणं कृत्वा अप्रस्तुतस्य वर्णनमसम्बन्धप्रलापवत् प्रतीतमिति। मुख्यार्थे वाधिते सति सामान्यविशेषकारणत्वात् कार्यकारणभावसादृश्यवशाद् वा प्रस्तुतार्थस्य बोधः जायते। अतः अलङ्कारस्य लक्षणामुलारूपेण ग्रहणं न असम्भावनीयमिति —

"इयं चासम्बन्धप्रलापिताप्रसङ्गेना प्रस्तुतस्याभिधातुमनुचितत्वाद्बाधितमुख्यार्थया सामान्यविशेषभाव-कर्यकारणत्व-सा दृश्यविरोधादिके सम्बन्धे चारूढप्रतीत्यादिलक्षणे प्रयोजने च सति प्रस्तुतमर्थं प्रतिपादयन्ती लक्षणामुलैव युक्त्या न तु व्यञ्जनात्मिका वाच्या बाधितत्वेन पर्यवसितत्वेन व्यञ्जनस्य सम्भवात्।"[23]

एकावलीति ग्रन्थे अप्रस्तुतप्रशंसा विषये यत् विवृतं प्राप्यते —

"इहाप्रस्तुतस्याप्रस्तुतत्वादेव वर्ननमनुचितमपि प्रस्तुतपरत्वेनौ चिती मालम्बत इति प्रस्तुतं व्यङ्गमप्रस्तुतस्य वाच्यस्य सिद्धिमादधातीति वाच्यसिद्ध्यङ्गमिदं गुणीभूतव्याङ्ग्यम्।... "[24]

अलङ्कारविशेषस्य स्वरूपनिर्धारणसमये येषां विषयाणां चर्चा कृता, तान् आश्रित्य अलङ्कारस्य विविधाः भेदाः सिद्धाः। प्राचीनालङ्कारिकैः यद्यपि भेदप्रकल्पे कापि नोक्ता, परन्तु नवीनालङ्कारिकाः अलङ्कारस्य भेदविषये उक्तवन्तः। भोजेन अलङ्कारस्य वाच्यव्यङ्गात्मकादौ भेदौ स्वीकृतौ, वाच्ये व्यङ्गे च निन्दा-स्तुत्यर्थकहेतुरूपगुणाः विद्यामानाः सन्ति। अतः तेनाश्रित्य भेदचतुष्टयम्, अनेन आहत्य दशभेदाः तेन विवृताः। कुन्तकानुसारेण अलङ्कारस्य भेदद्वयं स्वीकृतम् — साम्याश्रितभेदः सम्बन्धान्तराश्रितभेदश्च। विश्वनाथस्य गम्यगमकयोः भेदेन पञ्चप्रकाराः स्वीकृताः— क) विशेष सामान्यात्, ख) सामान्यं विशेषतः, ग)कार्यात् निमित्तम्, घ) कार्यं हेतोः, ङ) समात्समम्। मम्मटेन षड्भेदाः निर्णिताः, क) कार्ये प्रस्तुते कारणस्य वर्णनम्, ख) कारणे प्रस्तुते कार्यस्य वर्णनम्, ग) सामान्ये प्रस्तुते विशेषस्य वर्णनम्, घ) विशेषे प्रस्तुते सामान्यस्य वर्णनम्, ङ) तुल्ये प्रस्तुते तुल्यान्तरस्य वर्णनम्, च) प्रस्तुते वाच्ये प्रतीयमानस्य अप्रस्तुताध्यारोपणम् —

"कार्ये निमित्ते सामान्ये विशेषे प्रस्तुते सति।
तदन्यस्य वचस्तुल्ये तुल्यस्येति च पञ्चधा।
इयं च काचित्वाच्ये प्रतीयमानार्थानध्यारोपेनैव भवति"[25](का°प्र ५|६६)

आचार्येण अभिनवगुप्तेन भेदप्रसङ्गे उक्तम् —

"अप्रस्तुतस्य वर्णनं प्रस्तुताक्षेपिण इत्यर्थः।
स चाक्षेपस्त्रिविधो भवति-सामान्यविशेषभावात्,निमित्त-निमित्तिभावात्,सारूप्याच्च।"[26](लोचन,१I १३)

"पादाहतं यदुथ्थाय मूर्धानमधिरोहति।
स्वस्थादेवापमानेऽपि देहिनस्तद्वरः रजः।"[27](सा.द)

शिशुपालवधमहाकाव्यस्य द्वितीयर्सगादुद्धृतोऽयं श्लोकरप्रस्तुतप्रशंसालङ्कारस्योत्कृष्टोदाहरणम्। अत्र सामान्यभावेन जीवापेक्षया धूलिकायाः श्रेष्ठत्वं वर्णितम्।अत्र जीवाःप्राकरणिका वा मूलवर्णनीयविषया न, अपमानेऽप्यचला यादवा वर्णनीयविषयाः।देहिसामान्यमित्यप्रस्तुतविषयकः। अप्रस्तुतदेहिसामान्यात् प्रस्तुतदेहिविशेषस्य(अर्थात् अप्रस्तुतजीवात् प्रस्तुतयादवानाम्) व्यञ्जनामार्गेण प्रतीतिवशादप्रस्तुतप्रशंसायाः दृष्टान्तोऽयम्।सम्यकपरिशील्य दृश्यते यदलङ्कारस्य सुस्पष्टलक्षणविचारे नवीनालङ्कारिकैः यः मार्गोपरचितः,मार्गोऽयमधिकसमादृतः। अनेन अलङ्कारस्वरूपस्य नवीना दिशा उन्मुक्ता भवति। अलङ्कारस्य निरवशेषरूपस्योद्भावनमनेन भवति।

1. ऋ.वे.१/१|९
2. कठ,३/३
3. Brahmaputra. Alamkar Kosha. Indu Editor, Delhi, 2nd ed., 1989,160
4. का°सू°१|१|१-२

5. कामधेनु
6. का°ल १|१३
7. का°द°२|१
8. का°सू° ३I१I२
9. ध्वन्या°२|५
10. र.ग
11. का°ल ३I २९-३०
12. का°द ३ ।३४०
13. का°द २I३४१
14. का°ल ५I८
15. का°ल
16. का.सू. ४I३-४
17. सं.कं.४.५४
18. सा.द.१०I ५८
19. सा. द.१०I ५८
20. वक्रो.४.२३
21. का.प्र.१०I९८
22. Brahmaputra. Alamkar Kosha. Indu Editor, Delhi, 2nd ed., 1989,157
23. Brahmaputra. Alamkar Kosha,158
24. ibid.,159
25. का°प्र ५|६६
26. लोचन,१I १३
27. सा.द

## ग्रन्थतालिका:


1. Bandyopadhyay, Sureshchandra, and Chanda Chakroborty (Translator). Bharatyashastra. Nabapatra, Calcutta, 6th ed., May 2014.
2. Mukhopadhyay, Ramaranjan. Rasasamiksha. Sanskrit Pustak Bhandar, Calcutta, 2021 ed.
3. Singharoy, Jibendra. Bangla Alamkar. Modern Book Agency Private Limited, Calcutta, 2nd ed., 1958.
4. Chakroborty, Shyamapada. Alamkara Chandrika. K.P. Basu Printing Works, Calcutta, ed., 1363 Bangabda.
5. Asbasthite, Brahmaputra. Alamkar Kosha. Indu Editor, Delhi, 2nd ed., 1989.
6. Batsya Chakraborty, Srikrishnamuri. (edited),Kavyalamkara Sutrabritti. Srinaga: Sri Bani Bilas, 1909 ed.
7. Sarma, Pandit Kedarnath. Saraswati Kanthabharana. Edited by Wasudev Laxman Sastri Paniskar, Pandurang Jawai, Bombay, 1934 ed.
8. Divedi, Parasnath. Kavyaprakash. Binod Pustak Mandir, Agra.


**लेखक परिचय:** सौमी भट्टाचार्य, मौखिक संस्कृत शिक्षक, विश्वभारती, शांतिनिकेतन।